# MASTER OF ARTS EXAMINATION, 2023

(2nd Year, 2nd Semester)

## SANSKRIT

## COURSE – XIX / A

## [ SANSKRIT DRAMA ]

Time : Two hours　　　　Full Marks : 30

*The figures in the margin indicate full marks.*

### विभाग-क

1. अधोलिखिताः प्रश्नाः देवनागरीलिपिमाश्रित्य च समाधेयाः।

क) 'समुदिता येषां गुणा भूतये। ते भृत्याः नृपतेः कलत्रमितरे सम्पत्सु चापत्सु च' – कस्य उक्तिरियम्? कमुद्दिश्य वक्ता किमुक्तवान्? $\frac{1}{2}+\frac{1}{2}+1$

ख) 'अस्माकं त्वत्संग्रहे यत्नः, कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति' – कः वक्ता? कस्मात् कारणात् वक्ता इदमुक्तवान्? $\frac{1}{2}+1\frac{1}{2}$

ग) आहितुण्डिकः इत्यस्य अर्थः दीयताम्। तस्य नाम किम्? स कुत्र किमर्थमागतवान्? $1+\frac{1}{2}+1+1\frac{1}{2}$

घ) कस्तावत् शकटदासः? 1

2. प्रसङ्गनिर्देशपूर्वकं तात्पर्यं लेखनीयम् – 6

सुलभेष्वर्थलाभेषु परसंवेदने जनः।
क इदं दुष्करं कुर्य्यादिदानीं शिविना विना।





अथवा

विरुद्धयोर्भृशमिह मन्त्रिमुख्ययोर्महावने वनगजयोरिवान्तरे।
अनिश्चयाद्जवशयेव भीतया गतागतैर्ध्रुवमिह खिद्यते श्रिया॥

### विभाग-ख

3. किं नाम रूपकनाटकम्? रूपकनाटकरूपेण संस्कृतसाहित्यजगति प्रबोधचन्द्रोदयस्य विशेषत्वं विचारयत। 10

अथवा

नवद्वारपुरी-पञ्चक्लेश-माहाव्रती-ऋतम्भरा प्रज्ञा – इत्येतेषु यथामति विषयद्वयमवलम्ब्य टीकाद्वयं विरचनीयम्। 5+5=10

4. अधःप्रदत्तेषु कस्यचन एकस्य तात्पर्यं सरलसुरगिरा लेखनीयम्- 5

क) सहजमलिनवक्रभावभाजां / भवति भवः प्रभवात्मनाशहेतुः।
जलधरपदवीमवाप्य धूमो / ज्वलनविनाशमनु प्रयाति नाशम्॥

ख) यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम्।
विद्या तपश्च तीर्थं च स तीर्थफलमश्नुते॥

ग) मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम्।
निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिखाम्॥